http://www.bsehonline.com/

**CLASS : 10th (Secondary)** **Code No. 3508**

**Series : Sec. M/2018**

रोल नं०

**SET : D**

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

**शेमुषी (नई पुस्तक)**

*समय : 3 घण्टे ]* *[ पूर्णांक : 80*

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न 16 हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश : –*

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।



http://www.bsehonline.com/

http://www.bsehonline.com/



*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $4 \times 2 = 8$

संसारे कुटिलाः अपि जनाः सन्ति, सरलाः अपि। सरलाः जनाः प्रकृत्या परेषां हितचिकीर्षवः भवन्ति। परन्तु कुटिलाः जनाः स्वभावेन परेषाम् अहितम् इच्छन्ति। तेषां शक्तिः परेषां पीडनाय, बुद्धिश्च परेषां वञ्चनाय भवति। तेषां गतिः विचित्रा भवति।

*प्रश्नाः –*

(क) संसारे कीदृशाः जनाः सन्ति ?

(ख) के परेषां हितचिकीर्षवः भवन्ति ?

(ग) कुटिलाः जनाः किम् इच्छन्ति ?

(घ) कुटिलजनानाम् गतिः कीदृशी ?

**खण्डः 'ख'**

**(रचनात्मकं कार्यम्)**

**2.** (क) विकासः नैनीतालस्थे एकस्मिन् विद्यालये पठति। सः छात्रावासात् नैनीतालविषये अमेरिकावासिनं मित्रं जोसेफं एकं पत्रं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु –

$4 \times 1 = 4$

परीक्षाभवनम्

तिथिः

प्रियमित्र जोसेफ,



http://www.bsehonline.com/

http://www.bsehonline.com/



नमो नमः।

गतमासे (i) .......... वार्तालापः अभवत्। दिनद्वयानन्तरम् एव अत्र (ii) .......... आरभत। अत्र यात्रिणः 'चाइना-पीक' इति स्थानं द्रष्टुम् गताः। (iii) .......... समूहं दृष्ट्वा स्थानीया आपणिकाः प्रमुदिता आसन्। भोजनालयेषु (iv) .......... दुर्लभः अभवत्। अहम् इच्छामि यत् ईदृशे अवसरे भवान् अपि भारते आगच्छेत्।

भवताम् मित्रम्

विकासः।

**मञ्जूषा**

| हिमपातः, आवासः, आवयोः, यात्रिणाम्। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – 4 × 1 = 4



*प्रश्नाः* –

(i) एका बालिका .......... गृहीत्वा आगच्छति।



http://www.bsehonline.com/

http://www.bsehonline.com/



(ii) ........... आगमनं जायते।

(iii) ........... दिनम् अस्ति।

(iv) जले ........... सञ्चाल्यन्ते।

**मञ्जूषा**

| कर्गदनौकाः, आतपत्रं, वर्षाऋतोः, मेघाच्छन्नम्। |
|---|

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः – 1 × 4 = 4

एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतो वंशस्य कर्त्ता ?

**अथवा**

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य सः पार्श्वस्थिते ग्रामे रात्रि निवासं कर्त्तुम् कञ्चिद् गृहस्थमुपागतः।

**4.** अधोनिर्दिष्टस्य श्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः –

1 × 4 = 4

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।

वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।



http://www.bsehonline.com/

http://www.bsehonline.com/



यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।

शुचिपर्यावरणम् ...........

**अथवा**

आश्वास्य पर्वतकुलं तपनोष्णतप्तम्।

उद्दामदावविधुराणि च काननानि।

नानानदीनदशतानि च पूरयित्वा,

रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः।

**5.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – $2 \times 2 = 4$

(क) पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।

(ख) युष्मद्दर्शनात् कुशलमिव।

(ग) अकारणद्वेषि मनस्तु यस्य वै, कथं जनस्तं परितोषयिष्यति।

(घ) यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।

**6.** अधोलिखितं गद्यांशं पठित्वा निर्दिष्ट-प्रश्नानामुत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति।

***प्रश्नाः*** –



http://www.bsehonline.com/

http://www.bsehonline.com/



(क) गृहाभ्यन्तरं कः प्रविष्टः ?

(ख) चौरस्य पादध्वनिना प्रबुद्धः अतिथिः किम् अकरोत् ?

(ग) विचित्रं किम् अघटत ?

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये – $2 \times 1 = 2$

रात्रौ जानुर्दिवा भानुः कृशानु सन्ध्योर्द्वयोः।

इत्थं शीतं मया नीतं जानुभानुकृशानुभिः।।

*प्रश्नाः* –

(क) रात्रौ शीतम् अपनेतुं साधनं किम् ?

(ख) कृशानुः कदा शीतापनयने सहायकः भवति ?

**8.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) आर्यस्य प्रसादेन मे वाणिज्या अखण्डिता।

(ख) आरोग्यं व्यायामात् उपजायते।

(ग) सा कन्या अतिथिं स्नानाय प्रेरितवती।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय 'शेमुषी भाग-2' स्वपाठ्य- पुस्तकात् ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

**खण्डः 'घ'**
**(अनुप्रयुक्त–व्याकरणम्)**



http://www.bsehonline.com/

http://www.bsehonline.com/



**10.** (क) अयादिसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) तत्पुरुषसमासस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत – $3 \times 1 = 3$

(क) ............. हरीतिमा तत्र शुचि-पर्यावरणम्। (यत्र / एव)

(ख) वयं ............. प्रसन्नाः भवेम्। (कदा / सदा)

(ग) त्वं प्रातः ............. गच्छसि ? (विद्यालयं / कुत्र)

**12.** प्रदत्तोपपदविभक्ति-वाक्येषु उचितविभक्तिप्रयोगं कुरुत – $4 \times 1 = 4$

(क) पिता ............. क्रुध्यति। (पुत्रं / पुत्राय)

(ख) पुत्रः ............. सह आपणं गच्छति। (मात्रा / मात्रेण)

(ग) ............. बहिः एकः सरः अस्ति। (नगरेण / नगरात्)

(घ) साधुः ............. तापसः प्रतीयते। (जटाभिः / जटाभ्याम्)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'बालक' शब्दस्य पञ्चमी-एकवचने।

(ख) 'पितृ' शब्दस्य सप्तमी-बहुवचने।

(ग) 'लता' शब्दस्य द्वितीया-द्विवचने।

(घ) 'युष्मद्' शब्दस्य तृतीया-एकवचने।



http://www.bsehonline.com/

http://www.bsehonline.com/



**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' धातु, लट्लकारस्य, प्र० पु०, द्विवचने।

(ख) 'पठ्' धातु, लृट्लकारस्य, म० पु०, बहुवचने।

(ग) 'गम्' धातु, लङ्लकारस्य, प्र० पु०, एकवचने।

(घ) 'कृ' धातु, लोट्लकारस्य, उ० पु०, एकवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

3 × 1 = 3

(क) सुगमः।

(ख) प्रतिवसति।

(ग) अनुसरति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत – 16 × 1 = 16

(क) 'सु + आगतम्' अत्र किं सन्धियुक्तपदम् ?

(i) सवागतम्

(ii) स्वागतम्



http://www.bsehonline.com/

http://www.bsehonline.com/



(iii) सुआगतम्

(iv) सुऽऽगतम्

(ख) 'एकैकः' इति पदस्य कः सन्धिविच्छेदः ?

(i) एक + एकः

(ii) एका + कः

(iii) एकै + कः

(iv) एके + क

(ग) 'उपनदि' इति पदस्य विग्रहम् किम् ?

(i) नद्यै समीपम्

(ii) नदीम् समीपम्

(iii) नद्याः समीपम्

(iv) नद्याम् समीपम्

(घ) 'अनुरथम्' इति पदे कः समासः ?

(i) द्वन्द्वः

(ii) तत्पुरुषः

(iii) बहुव्रीहिः



http://www.bsehonline.com/

http://www.bsehonline.com/



(iv) अव्ययीभावः

(ङ) 'अनादरः' इति पदस्य विलोमपदम् किम् ?

(i) आनदरः

(ii) समादरः

(iii) आदरः

(iv) आनादारः

(च) 'सुलभः' इति पदस्य विलोमपदम् किम् ?

(i) दुर्लभः

(ii) दुर्वहः

(iii) दुष्करः

(iv) दुःखदः

(छ) 'शीघ्रम्' इति पदस्य पर्यायपदम् किम् ?

(i) अवसि

(ii) सत्वरम्

(iii) यासि

(iv) गच्छसि

(ज) 'कन्या' इति पदस्य पर्यायपदम् किम् ?



http://www.bsehonline.com/

http://www.bsehonline.com/



(i) प्रौढ़ा

(ii) बालकः

(iii) बालः

(iv) बालिका

(झ) 'मृ + क्त' इति संयोगे किं रूपम् ?

(i) मिरतः

(ii) मृतः

(iii) म्रितः

(iv) मृत्

(ञ) 'पशुत्वम्' इति पदे कः प्रत्ययः ?

(i) त्व

(ii) ल्यप्

(iii) क्त्वा

(iv) ल्युट्

(ट) 'पञ्चविंशतिः' इति पदे का संख्या ?

(i) 35



http://www.bsehonline.com/

http://www.bsehonline.com/



(ii) 45

(iii) 25

(iv) 65

(ठ) 'नवनवतिः' इति पदे का संख्या ?

(i) 9

(ii) 69

(iii) 79

(iv) 99

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अति

(ii) प्रवासः

(iii) दीर्घः

(iv) अतिदीर्घः

(ढ) 'उदात्तरम्यः समुदाचारः' अत्र किं विशेषणम् ?

(i) उदात्त

(ii) रम्यः

(iii) उदात्तरम्यः



http://www.bsehonline.com/

http://www.bsehonline.com/



(iv) समुदाचारः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) श्यामः सायं ............ वादने उद्याने क्रीडति।




(ii) लता ............ वादने शयनाय गच्छति।






http://www.bsehonline.com/